दिनाङ्क :- 27.04.2025

प्रात: - 06:55

## प्रधानमंत्री/मन की बात

प्रधानमंत्री नरेन्द्रमोदी अद्य प्रात: एकादशवादने आकाशवाण्यां 'मन की बात' इत्येतस्मिन् कार्य्रकमे दैशिकै: बैदेशिकैश्च साकं स्वविचारान् विनिमयीकुर्यात्। मन की बात इत्येतस्य मासिक कार्यक्रमस्य एतत् एकिवंशत्यधि कैक शततमं प्रसारणं स्यात्। मन की बात इत्येतस्य प्रसारणम् आकाशवाण्या: दूरदर्शनस्य च सर्वाभि: वाहिनीभि: भवेत् । सममेव कार्यक्रम: एष: आकाशवाण्या: दूरदर्शनस्य प्रधानमन्त्री कार्यालयस्य सूचनाप्रसारणमन्त्रालयस्च च यूट्यूबवाहिनीभि: अति श्रोतुं शक्यते। कार्यकमस्य एतस्य हिन्दी-प्रसारणानन्तरं आकाशवाण्या क्षेत्रीयभाषासु अति प्रसारणं भवेत्।

## गृहमन्त्रालय/पहलगाम

गृहमन्त्रालयेन पहलगाम-आतं क्याक्रमणस्य अन्वेषणार्थं राष्ट्रिय-अन्वेषण-संस्था एन आई ए इत्येतस्य नियुक्तिकृता। सूत्रानसारि प्रतिपादितं यत् सम्प्रति एषा संस्था आंतक्याक्रमणस्य औपचारिकम अन्वेषणं कुर्यात्। एतत्पूर्वं राष्ट्रिय-अन्वेषण-संस्था एन आइ ए इत्येतस्य दलेन आतंक्याक्रमण-स्थलस्य यात्रा कृता। अवधेयं यत् आक्रमणमेतत् मासेस्मिन् द्वाविंशे दिनांके जम्मूकश्मीरस्य पहलगाम-स्थलस्य बैसरन-वन-क्षेत्रे जातं यत्र षड्विंशतिसंख्याका: जना: मृता: नैके हताहताश्चापि।

## सूचना-प्रसारण-मन्त्रालय

सूचना-प्रसारण-मन्त्रालयेन राष्ट्रिय-सुरक्षा-हितं निध्याय सर्वाभ्य: प्रसारणपरक वाहिनीभ्य: आतंक-विरूध्य-अभियानानां, सुरक्षा-बल-पदकक्षेपानां च सजीव-प्रसारणं न स्यात् इति परामर्श: पसारित:। एष: परामर्श: सर्वाभ्य: प्रसारण-वाहिनीक्ष्य:, सूचना-संस्थाभ्य:, सामाजिक-अन्तर्जाल-पटलेभ्यश्च प्रसारित:।

## मोहन भागवत

राष्ट्रिय-स्वंय-सेवक-सङ्घ-प्रमुखेण मोहन भागवत इत्यमुना सबलं प्रतिपादितं यत् अहिंसा भारतस्य धर्म:, जीवन मूल्यानां महत्वपूर्ण: अंश:, परम् उत्पीड़केभ्य : आंतकिभ्य: प्रत्युत्तर प्रदानमपि धर्म एव। गतदिने नवदेहल्यां द हिंदू मेनिफेस्टो इत्येतस्य पुस्तकस्य विमोचनावसरे कार्यक्रमं सम्बोधयन् भागवत: प्रतिपादितवान यत् भारतेन परेभ्य: न कदापि कष्टं प्रदीयते, परम यदि अन्ये केचन संलग्ना तर्हि न समाधानम। भागवत: सबलं प्रतियादितवान् यत् अहिंसा अस्माकं देश पूर्णरूपेण समाहिता।

<u>इण्डियन-प्रीमियर-लीग</u>

इण्डियन-प्रीमियर-लीग इत्येतस्यां क्रिकेट्-लीग-प्रतिस्पर्धायां गतदिने कोलकातानगस्य ईडन-गार्डन इति क्रीडांगणे समायोजितं द्वन्द्वं वर्षाकारणेन बाधितं, तदनन्तरं स्थगितञ्च । एतत्पूर्वं प्रथम दण्डेन क्रीडायता पंजाब-किंग्स इत्येतेन दलेन एकाधिकद्विशतं धावनांका: समर्जिता: प्रत्युत्तरे कोलकाता नाइट राइडर्स इत्येतेन दलेन प्रत्युत्तरे कोलकाता नाइट राइडर्स इत्येतेन दलेन केवलं यदा सप्त एव धावनांका समार्जिता: वर्षाकारणेन द्वन्द्वं बाधितं तत: स्थगितञ्चापि।

।। <u>इति वार्ता:</u>।।